International Journal of Sanskrit Research 2020; 6(5): 20-23

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 20-23
© 2020 IJSR
www.anantaajournal.com
Received: 09-07-2020
Accepted: 19-08-2020

**डॉ मुरारी कुमार मिश्र**
ग्रामः पत्रालयश्च–भंडारिसमः
द्वारा–मनीगाछी, मण्डलम्–दरभङ्गा
बिहार, भारत

**Corresponding Author:**
**डॉ मुरारी कुमार मिश्र**
ग्रामः पत्रालयश्च–भंडारिसमः
द्वारा–मनीगाछी, मण्डलम्–दरभङ्गा
बिहार, भारत

# काव्ये अर्थगतदोषाः

**मुरारी कुमार मिश्रः**

**प्रस्तावना**

सर्वेषु वस्तुषु दोषाणामपाकरणमावश्यकमस्ति। तद् विना वस्तुतः संशुद्धि न जायते। संशुद्धं हि वस्तु मनस्तुष्टिकरं, हृदयाह्लादकारं, सम्यक् कार्यसाधकं भवति।

आचार्येण मम्मेटन स्वकीयकाव्यप्रकाशे सप्तमे उल्लासे काव्यादोषाणां विस्तरेण विवेचनं कृतम्। काव्यदोषविवेचनप्रसङ्गे तेन प्रथमः दोषसामान्यस्य लक्षणं कृतम् तदनन्तरं दोषभेदानां विवेचनम्। दोषसामान्य लक्षणं कुर्वन् तेनोक्तं–

मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद् वाच्यः।
उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः।।[1]

दोषसामान्यस्य लक्षणादनन्तरं आचार्योऽयं त्रिप्रकारकानां दोषभेदानामुल्लेखं कृतवान् पददोषः, अर्थदोषः, रसदोषाश्च।

आचार्यो मम्मटः अर्थदोषान् वर्णयति । तद्यथा–

अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमगम्याः।।[2]
सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरूद्धश्च।
अनवीकृतः सनियमानियमविशेषाविशेषपरिवृत्ताः।।[3]
साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः।
विध्यनुवादायुक्तस्त्यक्तपुनः स्वीकृतोऽश्लीलः।।[4]

अर्थात् अर्थदोषान्तर्गते अपुष्टत्वम्, कष्टत्वम्, व्याहतत्वम्, पुनरूक्तत्वम्, दृष्टक्रमत्वम्, ग्राम्यत्वम्, सन्दिग्धम्, निर्हेतुत्वम्, प्रसिद्धिविरुद्धम्, विद्याविरुद्धम्, अनवीकृतत्वम्, नियमे अनियमत्वम्, अनियमे नियमत्वम्, विशेषे अविशेषत्वम्, अविशेषे विशेषरुपपरिवृतत्वम्, साकाङ्क्षत्वम्, अपदयुक्तत्वम्, सहचरभिन्नत्वम्, प्रकाशितविरूद्धत्वम्, विध्ययुक्तत्वम्, अनुवादायुक्तत्वम्, व्यक्तः पुनः स्वीकृतः, अश्लीलत्वं चैते त्रयोविंशतिविधाः अर्थदोषाः भवन्ति।

विश्वनाथमते पद–पद्यांश–वाक्य–अर्थ–रसरुपेण दोषाः पंधा सन्ति। अर्थदोषान् निरूपयन् तेनोक्तम्–

अपुष्टदुष्क्रमग्राम्यव्याहताऽश्लीलकष्टताः।
अनवीकृतनिर्हेतुप्रकाशितविरुद्धताः।।[5]
संदिग्धपुनरुक्तत्वे ख्यातिविद्याविरुध्दते।
साकांक्षता सहचरभिन्नतास्थानयुक्तता।।[6]
अविशेषे विशेषश्चानियमे नियमस्तथा।
तयोर्विपययौ विध्यनुवादायुक्तते तथा।।[7]
निर्मुक्तपुनरुक्तत्वमर्थदोषाः प्रकीर्तिताः।

1. काव्यप्रकाशः 1.71
2. काव्यप्रकाशः (सप्तमे उल्लासे) कारिका सं0– 55
3. काव्यप्रकाशः (सप्तमे उल्लासे) कारिका सं0– 66
4. काव्यप्रकाशः (सप्तमे उल्लासे) कारिका सं0– 57
5. साहित्यदर्पणः (सप्तमे परिच्छेदे) कारिका सं0–9
6. साहित्यदर्पणः (सप्तमे परिच्छेदे) कारिका सं0– 10
7. साहित्यदर्पणः (सप्तमे परिच्छेदे) कारिका सं0– 11

अर्थात् आचार्येण विश्वनाथेनार्थवर्गे अपुष्टत्वम्, दुष्क्रमत्वम्, ग्राम्यत्वम् व्याहतत्वम्, अश्लीलत्वम्, कष्टार्थत्वम्, अनवीकृतत्वम्, निर्हेतुत्वम्, प्रकाशविरुद्धत्वम्, संदिग्धत्वम्, पुनरूक्तता, प्रसिद्धिविरुद्धता, विद्याविरुद्यता, साकांक्षता, सहचरभिन्नत्वम्, अविशेषे विशेषः, अनियमे नियमः, विशेषेऽविशेषः, नियमेऽनियमः विध्युक्तता, अनुवादायुक्तता, निर्मुक्तपुनरुक्तत्वम् च एते त्रयोविंशतिः(23) अर्थदोषाः निरुपिताः सन्ति।

कविजयदेवः स्वकीये चन्द्रालोके अर्थदोषान् वर्णयति। तद्यथा–अर्थवर्गे अपुष्टार्थम्, कष्टम्, व्याहतम्, पुनरुक्तम्, दुष्टक्रमम्, ग्राम्यम्, सन्दिग्धम्, अनौचित्यम्, विरुद्धम्, सामान्यपरिवृत्तत्वम्,विशेषपरिवृत्तत्वम्, सहचराचारुत्वम्, अन्योन्यसंगतिः चैते दोषाः निरुपिताः सन्ति।

काव्याशास्त्रज्ञः रूद्रटाचार्येण स्वकीये काव्यालौारे एते अर्थदोषाः निरुपिताः। तद्यथा–अपहेतुः, अप्रीतः, निरागमः, बाधयन्, असम्बद्धः, ग्राम्यः, विरसः, तद्वान् तथा अतिमात्रः।

अत्राहं काव्यप्रकाशानुसारेण क्रमशः अर्थदोषान् वर्णयामि। यद्यथा–

1. **अपुष्टार्थत्वम्**– पुष्टिार्ईन्नोऽपुष्टः, अपुष्टोऽर्थो यत्र, तस्य भावस्तत्वम्। यत्र विवक्षित एवार्थोऽन्यथा विधानेऽपि दुष्यति सोऽर्थदोषः। अशक्त्युत्रयेन श्रोतुर्वैमुख्यं दूषकताबीजम्। नित्योऽयं दोषः। सुधासागरे चैवमुलिखितम्– 'पुष्टत्वं विवक्षितार्थबोधप्रयोजकानुपादनकत्वम्। तद्वि–रहश्च द्विधा अप्रयोजकत्वात् प्रयोजकत्वेप्यन्यलभ्यत्वाच्च। यथा अतिविततगगनसरणीयत्यत्र [8] अतिवितत – सरणि – प्रसारणत्वमरुदुल्लसितसौरभत्वरूपाणामर्थानामुपादानेऽपि प्रकृतार्थस्याक्षतरेपुष्टार्थत्वम्। अधिक–पदत्वे अविवक्षितोऽप्यर्थः कथँदिन्वितयाभिधीयते। स्फटिका–कृतिनिर्मलः इत्यत्र नाकृतिपदार्थः उपमानत्वेन विवक्षितः, तस्य नैर्मल्या–भावात्। ''यदपि च न कृतं नितम्बिनीनामित्यत्रापि च रतस्य स्तनपतना–वधिकत्वव्यतिरेक एवानुचितत्त्वेन विवक्षितः।

2. **कष्टत्वम्**– कष्टः प्रतीतिक्लेशवान् दुरूहः। प्रतीतिविरह–श्चास्य दूषकताबीजम्। नित्योऽयं दोषः। यथा–सदा मध्ये यासामियम–मृतनिस्यन्दसुरसेत्यत्र [9] विवक्षितोऽर्थः शब्दान्तरैः कथाँद्यो–जितोऽपि क्लेशेनैव प्रतीयते इत्यर्थ एवायं दुष्टः। स्वकाव्यस्य गम्भीरचम–त्कृतार्थशालितया स्फुटार्थत्वाभावेऽपि दोषाभाससमर्थनाय कस्यचित्कवेरुक्तिः। न च क्लिष्टत्वदोषेणास्य सौर्यम्। स तु शब्ददोषः घटनान्तरेणार्थस्य सुखेनैव प्रतिपत्तेः।

3. **व्याहतत्वम्**– निन्दित्वा पुरस्कृत्य वा तदन्यथाकरणम्। तच्च द्विविधम्–क्वचिन्निन्दित्वा प्रशंसाकरणम्, क्वचित् प्रशंस्य निन्दा–करणम्। तथा चोक्तम्–

> उत्कर्षो वापकर्षो वा प्राग् यस्यैव निगद्यते।
> तस्यैवाथ तदन्यैश्चेद् व्याहतोऽर्थस्तदा भवेत्।।[10]

एवमुपलक्षितविरुद्धवान् व्याहतः। अत्र हेयोपादेयत्व विरोधो दूषकताबीजम्। तत्राद्यं निन्दित्वा प्रशंसनम्, यथा– ''जगति जयिनस्ते भावाः नवेन्दुकलादयः [11] इत्यादौ पूर्वार्धे येन साधारणचन्द्रिकाकलादयः स्वयं प्रत्यसारतया प्रतिपादिताः तेनैवोत्तरार्धे चन्द्रिकात्वमुत्कर्षायारोप्यते इति व्याहतत्वम्। द्वितीयं प्रशंस्य निन्दाकरणं, यथा–देवि! त्वन्मुखपौजेन शशिनः शोभातिरस्कारिणेत्यत्र पूर्वार्धे मुखोपमानतया पौजान्युत्कर्ष्य तेषामेवाग्रे विनिर्जितानीति तत्कृतापकर्षवर्णनाद् व्याहतत्वम्।

4. **पुनरुक्तत्वम्**– शब्देनावगतत्त्वेऽपि पुनस्तद्वाचकेन पर्यायान्तरेण प्रतिपादितः। द्विविधोऽयं पदार्थवाक्यार्थभेदात्। तयोराद्यः पदार्थस्य पुनरुक्तत्वं, यथा– कृतमनुमतं दृष्टं यैरित्यत्रा[12] अर्जुनस्येति सम्बोध्य यैर्भवर्ईरित्यनेन परामृश्य तेषामित्यनेन परामर्शादर्जुनस्यापि प्राप्ते सभीमकिरीटिनामिति किरीटिपदार्थः पुनरुक्तः। न च प्रधानप्रतिपत्तये इत्यदोषता, सम्बोधनेनैव तल्लाभात्। वाक्यार्थस्य पुनरुक्तत्वं यथा– अस्त्रज्वालावलीढेप्रतिबलजलधेरन्तरौवार्यमाणेत्यत्र कर्णालं सम्भ्रमेण इत्युक्तेऽपि पुनः 'को भयस्यावकाश इत्युक्तमतो अलं सम्भ्रमेण, को भयस्यावकाशेत्यभित्रार्थाविति दोषः निष्प्रयोजनं द्वितीयाभिधानेन श्रोतुर्वैमुख्यं दूषकताबीजम्। ननु अर्थाविचारे शब्दपौनरुक्त्यं स्थूलत्वादस्य। यथाह भामहः –

> न शब्दपौनरुक्त्यं तु स्थौल्यादत्रोपवर्ण्यते।
> कथमाक्षिप्तचित्तोऽपि तदेकममिधास्यते।।
> उत्कानुन्मनयन्त्येते गम्भीराः स्तनयित्नवः।
> अम्भोधरास्तडित्वन्तो गम्भीराः स्तनयित्नवः।।

5. **दुष्क्रमत्वम्**– दुष्टः अनुचितः क्रमो यत्र तत्तत्वम्। दुष्क्रमत्वं क्रमस्य लोकशास्त्रविरुद्धत्वम्। विरोधेनार्थाप्रतीतिर्दूषकताबीजम्। नित्योऽयं दोषः। तथाद्यं लोकविरुद्धं, यथा– भूपालरत्न–निर्दैन्येत्यत्र [13] च राजानम्प्रति कस्याचिदर्थिन उक्तिः। अत्र मातङ्गं वा तुरङ्ग वेत्युक्ते विपर्ययेणोक्तिर्दोषः। लोके गुरुदानाशक्तौ लघुदानौचित्यात्। द्वितीयं शास्त्रविरुद्धं यथा–

> काराविऊण खउरं गामदुजो मज्झिऊण जेमिअ अ।
> णक्खत्तं तिहिवारे जोइसिअं पुच्छिदुं चलिदो।।

कारियित्वा क्षौरकर्म ग्रामद्विजो मज्जयित्वा भुक्त्वा च। नक्षत्रतिथि–वारौ ज्योतिषिकं प्रष्टुं चलितः। इत्यत्र नक्षत्रादिलग्नपूर्वकं क्षौरस्य धर्मशास्त्रेण विधानादत्र क्रमो धर्मशास्त्रविरुद्ध इति विरोधेनार्था–प्रतीतिर्दूषकताबीजम्।

6. **ग्राम्यत्वम्**– ग्राम्यो ग्रामसम्भवः। अविदग्धोक्तिप्रतिपादितो रिरंसादिरित्यत्र आदिपदेन व्यवहारोक्तमपि ग्राम्यप्रयोगो दुष्टः इति व्यज्यते। उक्तं–

> स ग्राम्योऽर्थो रिरंसादिः पामरैर्यत्र कथ्यते।
> वैदग्ध्यवक्रिमवलं हित्वैव वनितादिषु।।

सहृदयवैमुख्यमत्र दूषकताबीजम्। सुरतारम्भगोष्ठादावभीष्टत्वादनित्योऽयम्। । यथा– ''स्वापिति यावदयं निकटे जनः स्वपिमि तावदहं किमपैति ते ''इत्यत्र नवोढाम्प्रति रिरंसोक्तिः। निकटे तावदहं स्वपिमीत्य–स्याविदग्धस्य रिरंसोक्तीत्ययमर्थो ग्राम्यः। नायकश्चविदग्धः। व्यवहारोक्तं ग्राम्यप्रयोगो। यथा–

> गोरपत्यं बलीवर्दो धसमत्ति मुखेन सः।
> मूत्रं मुंति शिश्नेन अपानेन तु गोमयम्।।

7. **सन्दिग्धत्वम्**– प्रकरणाद्यभावात् सन्दिह्यमानाऽर्थः सन्दिग्धः, तस्य भावस्तत्त्वम्। उद्देश्यनिश्चयविरहो दूषकताबीजम्। यत्र तु सन्देह एवोद्देश्यस्तत्रादोषत्वमित्यनित्योऽयं दोषः। यथा–मात्सर्यमुत्सार्येत्यादौ भूधरनितम्बानां कामिनीनितम्बानां वा सेव्यत्वं व्यङनया प्रतिपिपादयिषितम्, तद्विरुद्धयोपस्थित्या द्वितीयेन सन्दिह्यते प्रकरणाद्यभावादेकतरनितम्बस्यासेव्यत्वनिर्णयेनासन्देहः। वन्द्यामित्यादौ द्वितीयासप्तमीभ्यां पदे एव सन्देहः। अत्र तु पदानामसन्दिग्धत्वे सत्येव स इति पदसन्दिग्धत्वाद्भेदः।

8. काव्यप्रकाशः (सप्तमे उल्लासे) पृ0सं0–236. चौखम्भा विद्याभवन प्रकाशन
9. काव्यप्रकाशः (सप्तमे उल्लासे) पृ0सं0– 236
10. मालतीमाधवम् (भवभूतेः) प्रथमा©
11. काव्यप्रकाशः (सप्तमे उल्लासे) पृ0सं0– 237
12. वेणीसंहार (तृतीया©)
13. काव्यप्रकाशः (सप्तमे उल्लासे) पृ0सं0– 238

8. **निर्हेतुत्वम्**– निष्क्रान्तो हेतुर्यस्मात्तस्य भावस्तत्वम्। अनुपत्तिहेतुकार्थो वेति। यथा– गृहीतं येनासीः परिभवभवान्नोचितमपीत्यत्र[14] सशोकस्याश्वत्थाम्नः स्वशस्त्रं प्रत्युक्तिः। अत्र अश्वत्थामकर्तृके शस्त्रविमोचने हेतुरुपादातव्यः। यथात्रैव द्रोणाचार्य कर्तृके शस्त्रत्यागे ''सुतशोकान्नतु भयादित्यन्वयव्ययतिरेकाभ्यां हेतुरुपात्तः। तथैवाश्वत्थाम्नोऽपि शस्त्रत्यागे हेतुरावश्यकस्तत्र नोक्त इति निर्हेतुत्वम्।

9. **प्रसिद्धिविरुद्धत्वम्**– प्रसिद्धेः लोकप्रसिद्धेः कवि सम्प्रदाय–प्रसिद्धेश्च विरुद्धं, तस्य भावस्तत्वम्। अर्थाद्यत्रार्थे न प्रसिद्धिः। स च द्विविधः लोकप्रसिद्धिविरुद्धः कविप्रसिद्धिविरुद्धश्च। अर्थाल्लोकप्रसिद्धि–भ्रान्त्या प्रयुक्तं लोकप्रसिद्धविरुद्धम्। यथा– ''इदन्ते केनोक्तं कथय कमलातौवदने''[15] इत्यत्र कामस्य चक्रं लोके प्रसिद्धविरुद्धमुक्तम्। कामस्य पंशरत्वमेव प्रसिद्धम्।कविप्रसिद्धिविरुद्धन्तु– कविस्म्प्रदायप्रसिद्धि–भ्रान्त्या प्रयुक्तं कविप्रसिद्धिविरुद्धम्। यथा–उपपरिसरं गोदावर्य्याः परित्यजताध्वगाः इत्यस्मिन् पद्ये कविसम्प्रदायाप्रसिद्धः अशेकस्यौरोद्गमः वर्णितः इति कविप्रसिद्धिविरुद्धोऽर्थः। कविसमयप्रसिद्धिश्चेयम्–

स्त्रीणां स्पर्शात् प्रियंर्त्रुर्विकसति बकुलः सीधुगण्डूषसेकात्,
पादाघातादशोकस्तिलककुरबकौ वीक्षणालित्राभ्याम्।
मन्दारो नर्मवाक्यात् पटुमधुहसनाच्चम्पको वक्त्रवाता–
च्चूतो गीतान्नमेरुर्विकसति च पुरो नर्तनात्कर्णिकारः।।

क्वचिल्लोकविरुद्धस्यापि कविप्रसिद्धत्वेन न विरुद्धमिति 'सुसितवसनालौरायामि' त्यादिपद्ये कीर्तेर्धवलतागुणाश्रयत्वरूपं मूर्तत्वं ज्योत्स्नावत्प्रकाशकता च लोकविरुद्धे अपि कविसम्प्रदायसिद्धे इत्यदोषतैव। अत्र साहित्यचूडामणिकारः– ''लोकयात्राकविमर्यादयोर्विप्रतिषेधे पूर्वदौर्बल्यम्। अमूर्ताया अपि कीर्तेः श्वैत्यविशिष्टत्वं लोकविरुद्धम्। लोकश्च 'लोको वेदास्तथाध्यात्मं प्रमाणं त्रिविधं स्मृतम्' इति व्यक्तिविवेकयुक्त्या मुख्यं प्रमाणम्। तथापि कविप्रसिद्धेः प्रबलायाः विद्यमानत्वात्र दुष्टमि' त्यवोचत्।

10. **विद्याविरुद्धत्वम्**– विद्याशब्दस्यात्र शास्त्रपरत्वेन, शास्त्रस्य चानेकत्वाद्वयाकरणेतरधर्मशास्त्रादिविरुद्धत्वम्। (क) धर्म– शास्त्रविरुद्धं यथा– 'सदा स्नात्वा निशीथिन्यां सकलं वासरं बधु' इत्यत्र रात्रौ स्नानं विहितं, तच्च धम्रशास्त्रेण विरुद्धम्। तथा हि–ग्रहोपरागं विना रात्रौ स्नानं निषिद्धम्– ''रात्रौ स्नानं न कुर्वीत राहोरन्यत्र दर्शनादि'ति। यथा वा शतातपः–

स्नानं दानं तथा श्राद्धमनन्तं राहुदर्शने।
आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्जयेत्।।

(ख) नीतिशास्त्रविरुद्धं यथा– 'अनन्यसदृशं यस्य बलं बाह्योर्विलोक्यते' इत्यत्र महाबलस्यापि राज्ञः षाड्गुण्यानुसरणमर्थशास्त्रेण विहितं तदन्यथाकरणं विरोधः। तथाहि– बलते संवृणोत्यात्मानमिति बलम्। षड्गुणा एव षाड्गुण्यम्–सन्धिर्विग्रहो यमनियमासनद्वैधीभावः। समाश्रयश्च तस्यानुसृतिर्निष्कलेत्यर्थशास्त्रविरुद्धम्।

(ग) कामशास्त्रविरुद्धं यथा– विधायदूरे केयूरमनोगागणमत्रनेत्यत्र केयूरस्थाने नखक्षतवर्णनं कामशास्त्रविरुद्धमिति दोषः। तथाहि– ''स्तने नखक्षतं प्रोक्तं जघनेऽपि क्वचिभ्दवेदित्यादि मतभेदेन स्थानानि कामशास्त्रे वर्णितानि यथा च–
कक्षाकरोरुजघनस्तनपार्श्वपृष्ठहृत्कन्धरासु नखराः खरवेगयोः स्युः।अप्यन्ययोर्नृप रते कलहे च शान्ते पुष्पे मदे प्रवसने विरहे च योज्याः।।

(घ) योगशास्त्रविरुद्धं यथा– ''अष्टात्रयोगपरिशीलनकील–नेत्यत्रासम्प्रज्ञातयोगमनपेक्ष्यैव विवेकख्यातिना मोक्षो वर्णित इति योगशास्त्रविरुद्धः। अयं भावः, योगश्चित्तवृत्तिनिरोधः। सैव समाधिः। असौ सम्प्रज्ञातासम्प्रज्ञाताभ्यां द्विविधः। तत्र वितर्कविचारानन्दास्मिताद्यनुगमात्सम्प्रज्ञातः। विरामप्रत्ययाभ्यासपूर्वकः संस्कारविशेषोऽसम्प्रज्ञातः। पूर्वं सम्प्रज्ञातः, ततो विवेकख्यातिः, तदासम्प्रज्ञात, ततो मुक्तिरिति क्रमः अत्रैत–द्विपरीतमुक्तमिति विरुद्धः।

(ङ) नाटयाशास्त्रविरुद्धं, यथा– रणद्भिराघट्टनया नभस्वतः पृथग्विभिन्नश्रुतिमण्डलैः स्वरैरित्यादौ आनुलोम्येन प्रतिलोम्येन वा नभस्वत्संचारे, क्रमेण स्वरा उत्पद्यन्ते, न पुनर्वैचित्र्येणेति कुतो रागसम्बन्धिनीनामन्तर्वर्णनामूर्च्छनानां स्फुटीभावः।

(च) पत्रकलाविरुद्धं, यथा– 'कालिंत्रे लिखितमिदं वयस्य पत्रं पत्रज्ञैरपतितकोटिकण्टकास्त्रीत्यत्र कलिंत्रे पतितास्त्रिकण्टकमिति हि पत्रविदाम्नायः। एतेषु विरुद्धार्थप्रतीत्या सहृदयहृदयवैरस्यमेव दूषकताबीजम्।

11. **अनवीकृतत्वम्** – अनवं नवं कृतमिति नवीकृतम् तद्विपरीतं, तस्य भावस्तत्त्वम्। भत्र्यन्तरेण प्रकारान्तरेण वा यन्नवत्वं तन्न प्रापितमित्यनवीकृतत्वम्। पिष्टपेषणन्यायेनाशक्तिप्रकाशनेन वा सहृदयोद्वेजकत्वं दूषकताबीजम्। यथा– प्राप्ताः श्रियः सकलकामदुघास्ततः किमित्यत्र ततः किम्, ततः किमित्यादिपुनरुक्त्याऽनवीकृतः। सवेत्वर्थेषु ततः किमिति भत्र्यन्तरेण न नवीकृतमिति दोषः। प्रत्युदाहरणं यथा– यदि दहत्यनलोऽत्र किमद्भुतमित्यत्र सर्वमेव नवीकृतमिति सर्वत्रैमेवमेव कविभिः प्रवर्त्यम्।

12. **सनियमपरिवृत्तत्वम्**– सनियमेन वक्तुमुचितोऽनियमेनोक्तो यत्र, तस्य भावस्तत्वम्। परिवृत्तिर्विनियमः। अर्थाद्यत्र सनियमस्य परिवर्तनं कृत्वा उच्यते। अव्युत्पत्युन्नयनेन वैमुख्याधायकत्त्वमेव दुष्टि–बीजम्। नित्योऽयं दोषः। यथा– ''यत्रानुल्लिखितार्थमेव निखिलमित्यत्र अन्योक्तौ आभासमात्रेण मणीकृतेषु इति सनियमत्वं वक्तुमुचितं निन्दनीयानां मणीनां गुणान्तरव्यावर्तनेन निन्दातिशय–प्रतीतेः अनियमे तु न निन्दनीयानां मणीनां गुणान्तराव्यवच्छेदप्रत्ययः। तस्माच्छायामात्रमणी–कृताश्मसु मणेस्तस्याश्मतैवोचितेति पठनीयम्।

13. **अनियमपरिवृत्तत्वम्**– अनियमेन वक्तुमुचितो नियमेनोक्त यत्र सः अनियमपरिवत्तस्तस्य भावस्तत्वम्। अधिकपदभेदो दूषकताबीजम्। यथा– वक्त्राम्भोजं सरस्वत्यधिवसति सदा शोण एवाधरस्ते इत्यादौ शोण एवाधरस्ते इत्यनियमोक्तौ सनियमेन कथनं दोषः। तथा चोक्तं सुधासागरटीकायाम्– ''अत्र शोण एवेति नियमो न वाच्यः, अन्यजला–शयानात्मकत्व प्रतीतौ पिपासानौचित्यातिशय–प्रतीतेरिति भावः।

14. **विशेषपरिवृत्तत्वम्**– विशेषवाचकपदप्रयोक्तव्ये सामान्यवाचकपदप्रयोगः। दूषकताबीजंास्य अर्थावबोधमान्द्यम्। यथा– श्यामां श्यामलिमानमानयतः भोः सान्द्रैर्मसीकूर्चकैरित्यत्र ज्यौत्स्नीरूपरात्रि–विशेषस्य विवक्षितत्वाद्विशेषत एव तदभिधानमुचितम्, अन्यथा श्यामा स्याच्छुरिका नित्यमित्यमरकोशाच्छ्यामाशब्दस्य निशासामान्यवाचितया तद्विशेषस्य प्रतीतौ विलम्बपत्तेरिति दोषः। तथा च सुधासागरे– 'अत्र ज्यौत्स्नीमिति श्यामाविशेषो वाच्यः। श्यामायाः निशासामान्यवाचितया कृष्णपक्षनिशाया अपि लाभात्। तत्र च श्यामत्वविधानस्यायुक्तत्वाददग्धदहनन्यायेन प्राप्तेभावाद् विध्यनुरोधवैषम्यापत्तिरिति।' अपरविशेषस्य स्वत एव श्यामत्वात्तत्राकाङ्क्षाविरहादिरभेदेनात्र दूषकताबीजम्।

15. **सामान्यपरिवृत्तत्वम्**– अविशेषपदप्रयोक्तव्ये विशेषवाचकपदप्रयोगः, सामान्यस्य अविशेषस्य परिवृतिः विनिमयः तस्य भावस्तत्त्वम्। यथा अत्रैकेन रत्नेन एवंविधोत्कर्षलाभादन्येषामपि रत्नानामवमाननं

---
14. वेणीसंहार (तृतीये अंके)
15. काव्यप्रकाशः (सप्तमे अंके) पृ0सं0–239

नोचितमित्यर्थो विवक्षितः, स च कौस्तुभेनेति विशेषतोऽभिधानेन निर्वहति। कौस्तुभस्योपकारकत्वेऽपि अन्यरत्न–सामान्यावमानननिषेधायोगात् कौस्तुभस्य रत्नसामान्यान्तर्गतत्वेन प्रतीतेः। अत एव सामान्यपरिवृत्तत्वम्।

**16. साकाङ्क्षत्वम्**– साहाकाङ्क्षया वर्तते इतरपदार्थान्वयाय विशेषेणेति साकाङ्क्षः, तस्य भावस्तत्त्वम्। यद्वा, अनुमानाकाङ्क्षाविषयार्थकत्वम्। दूषकताबीजं चाभिधानापर्यवसानमतो नित्य एवायम्। यथा– अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभो! प्रत्युते' त्यत्र स्त्रीरत्नमितसस्यार्थः उपेक्षितुमित्यर्थमाकांक्षति। अन्यथा कथं मृष्यते इत्यनेनामर्षार्थकेनान्वयप्रसत्र स्यात् । न चाभवन्मतयोगसौरः, वक्तृविव–क्षितयोगस्यात्र सत्वात्। परंतु विवक्षित एवार्थः साकाङ्क्षतया दुष्टः, अतएव न न्यूनपदेऽप्यन्तर्भावः।

**17. अपदयुक्तत्वम्**– अपदे अस्थाने युक्तः सम्बद्धः। प्रकृतार्थविरुद्धार्थकपदशालित्वमपदयुक्तत्वम्। विरुर्थप्रतीतिश्चात्र दूषकताबीजम्। नित्योऽयं दोषः। यथा–आज्ञा शक्रशिखामणि–प्रणयिनी शास्त्राणि चक्षुर्नवमित्यत्र 'आश्चर्यमित्येकोऽपि गरीयान्दोषः समग्रमपि गुणग्रामं दूषयतीति चूर्णिकासाहाय्येन रावणोपेक्षैव विवक्षिता, सा च 'स्याच्चेदेष न रावण' इत्येतावतैव सम्पन्ना रावणपदस्य जगदाक्रान्त–कारित्वरूपार्थान्तरसङ्क्रमितवाच्यत्वात्। अतः 'स्याच्चेदेष न रावणः' इत्यत्रैव काव्यसमाप्तिरूचिता, तदनन्तरं क्व नु पुनः इत्यभिधानसमाधाने पर्यवस्यद्विवक्षतां रावणोपेक्षाप्रतीतिं स्थगयतीत्यपदयुक्तत्वम्। अयं सारः– ''स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगमितिन्यायेन अशेषगुणदूषप्रवीणमेतद्रावणत्वम्। एतावत्येव समाप्यामिति न पुनरुपरि क्व नु पुनरीत्यर्थान्तरन्यासः प्रयोज्यः। तथात्वे 'एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवौ' इति नीत्या रावणस्यापि वरणीयतया वरणीयत्वप्रसत्र। न चेदं समाप्तपुनरात्तम्। तत्र हि ''नव वयोल्लास्याय वेणुस्वनः इत्यस्य नानुपादेयत्वम्, अपितु ''प्रेम तनोतु व इत्यस्य प्रागेवोपादेयत्वम्। येन ''क्रौरः स्मरकार्मुकस्येत्यादिकारककदम्बकं कविराख्यातेन संगृहणन् वाक्यस्य समाप्ति–शौमुद्भव्य भूयः प्रस्तुतस्मरणन्यायादेकं विशेषणमुपात्तवान्।

**18. सहचरभिन्नत्वम्**– सहचरेषु समभिव्याहृतेषु, सहचरेभ्यः समभिव्याहृतेभ्यो वा भिन्नः विजातीय। एवं समभिव्याहृतविजातीयार्थकत्वं सहचरभिन्नत्वम्। व्यसनादिसमभिव्याहारेण बुद्धिशालिभिः श्रुतमपि त्याज्यं स्यादित्येतदेवात्र दूषकताबीजम्। उभयोरुपादेयत्वमनुपादेयत्वं वा प्रयीयते इति दूषकताबीजम्। यथा–श्रुतेन बुद्धिर्व्यसनेन मूर्खतेत्यत्र श्रुतबुद्ध्यादिभ्य उत्कृष्टेभ्य एकरूपतया सर्वेषामुपादेयत्वं त्याज्यत्वं वा प्रतीयते। तथा हि श्रुतादिसमभिव्याहारेण मूर्खस्य व्यसनं कर्तव्यमित्यपि स्यात्। अत्र श्रुतबुद्धयादिभ्य उत्कृष्टेभ्यः समभिव्याहृतेभ्यो व्यसन–मूर्खतयोर्विजातीयत्वम्।

**19. प्रकाशिताविरुद्धत्वम्** – प्रकाशितो व्यङ्गितो विरुद्धः विवक्षितार्थस्य प्रतिकूलार्थो प्रतिकूलार्थो येन सः। तथा च प्रतिपादित–विवक्षितार्थविरोधिव्यङ्कार्थकत्वं प्रकाशितविरुद्धत्वम्। सहचरभिन्ने पदार्थस्यैव तथात्वम्। 'अत्र तु वाक्यार्थस्येति' ततो भेदः। विरुद्धार्थप्रकाशनमेवात्र दूषकताबीजमिति नित्योऽयं दोषः। यथा–लग्नं रागावृतात्र्येत्यत्र अत्र विदितं तेऽस्त्विति वाक्यस्यार्थो, लक्ष्मीस्ततोऽपसरतीति राजस्तुतिः विरोधिनमर्थ प्रकाशयतीति प्रकाशितविरुद्धत्वम्।

**20. विध्ययुक्तत्वम्**– 'विध्यनुवादायुक्तः' इति कारिकांशेन विध्युक्तः अनुवादायुक्तश्चेति दोषद्वयमुक्तं काव्यप्रकाशे। तत्र विध्ययुक्तश्चायुक्तविधिः। विधेरयुक्तत्वङविधेयस्यैव विधेयत्वेन अयुक्त–क्रमतया वेति द्विविधः । विवक्षितानिर्वाहोऽत्र दुष्टिबीजम्। तत्राद्यमविधेयस्य विधेयत्वेन, यथा–प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशामित्यत्र दुर्योधनं प्रति अश्वत्थाम्न उक्तिः। अत्र पाण्डव–भयेनाद्यावधि तव निद्रा नाभूदेव, अद्य तु मया समितिषु निःशौतया निद्राणस्तवं वैतालिकस्तुतिभिः प्रयत्नेन बोध्यसे इति तात्पर्यम्। एवं शायितस्त्वं प्रयत्नेन बोध्यसे इति विधियुक्तो न तु शेषे इति शयनस्य, यतः शयित एव बोध्यते न तु बोधितः शेते इत्युक्तविधित्वम्। अविमृष्टविधेयांशे युक्तस्यैव विधिः परन्त्वविमर्श–मात्रम्, अत्र त्वयुक्तस्यैव विधिरिति ततो भेदः। द्वितीयमक्रमतया, यथा वाताहारतयेत्यत्र चर्मवसनं मेघतोयकणिकापानं वा बुभुक्षार्णोत्युत्तरोत्तरं तीव्रमिति तत्क्रमेणैव विधिर्युक्तः तदन्यथाकरणेनायुक्तमतया विध्ययुक्तत्वम्।

**21. अनुवादायुक्तत्वम्**– अयुक्तानुवादः। अयुक्तर्त्वात्र विध्यननुगुणत्वम्। अनुवादश्च सिद्धस्योपन्यासः । विधिविरुद्धत्वमेव दूषकताबीजम्। यथा–'अरे रामाहस्ताभरणेत्यत्र नीलोत्पलम्प्रति विरहिणः पुरुरवस उक्तिः। अत्र विरहिणः पुरुषस्य स्वमोहश्लथन–प्रार्थनायां विरहि–प्राणदमनत्वेनानुवादो न युक्तः विरहिविरोधित्वेन तन्मोहश्लथनायोगात्।

**22. त्यक्तपुनः स्वीकृतत्वम्**– पूर्वं त्यक्तोऽनन्तरं पुनः स्वीकृतः। तस्मिन्नेव वाक्यार्थे विशेषणार्थोपादाने समाप्तपुनरात्तत्वम्। अत्र त्वन्य एव वाक्यार्थः इति ततो भेदः। तथा चोक्तं चूडामणौ–''एकवाक्यतायां समाप्तपुनरात्तं भिन्नवाक्यान्तरस्य व्यक्तमयोग्यतायाम–पदयुक्तत्वम्। विपर्यये वाक्योपसंहारशौमुत्थाप्य पुनरर्थोपन्यासे त्यक्तपुनःस्वीकृत इति विवेकः। यथा– 'लग्नं रागावृतात्र्येत्यत्र न किंदिगणयती' त्यन्तेन कर्मकारकेण विदिक्रियान्वये समाप्तेऽपि भृत्येभ्य इत्यादिना पुनः कर्मकारकाभिधानमिति त्यक्तपुनः स्वीकृतत्वम्। लोके यथा त्यक्तस्य भक्ष्यादेः पुनरुपादानं वैरस्यमावहति तथैव सहृदयैः वैरस्याधानं दूषकताबीजम्। नित्योऽयं दोषः। विदितं तेऽस्त्वित्यनेन सर्ववाक्यपर्यन्त–प्रयोज्येनापि मध्ये गर्भीकृतेन वाक्यार्थः उपसंहृतोऽभूत्। पुनस्तेनास्मि दत्तेत्युपात्तश्च। अतोऽयमर्थदोषः।

**23. अश्लीलत्वम्** – ब्रीडाजुगुप्सामत्रलान्यतमव्यङ्कशब्दत्वमश्लीलत्वम्। अश्लीलार्थोपस्थित्या श्रोतुर्वैमुख्यं दूषकताबीजम्। नित्योऽयं दोषः। अर्थानुसन्धानेऽप्यश्लीलार्थव्यङकत्वमर्थत्वमर्थदोषत्वम्। यथा– हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिण इत्यत्र शब्दान्तरेणाप्युपादीयमानोऽयमर्थः पुंव्यङनादिसाधारण्येन प्रतीतेर्ब्रीडादायीत्यश्लील–त्वादर्थदोषोऽयमिति दिक्।